श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

## श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे

# ॥ एकोनविंशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ एकोनविंशः सर्गः ॥

## नभसोऽवतीर्णेन विभीषणेन श्रीरामचरणयोः शरणीकरणं श्रीरामपृष्टेन तेन रावणशक्तेः परिचयदानं रावणवधं प्रतिज्ञाय विभीषणं लङ्काराज्ये चाभिषिच्य तत्सम्मत्यैव तस्य समुद्रतटे उपवेशनम्

राघवेणाभये दत्ते सन्नतो रावणानुजः।
विभीषणो महाप्राज्ञो भूमिं समवलोकयत्॥ **6.19.1** ॥

खात् पपातावनिं हृष्टो भक्तैरनुचरः सह।
स तु रामस्य धर्मात्मा निपपात विभीषणः॥ **6.19.2** ॥

पादयोर्निपपाताथ चतुर्भिः सह राक्षसैः।
अब्रवीच्च तदा वाक्यं रामं प्रति विभीषणः॥ **6.19.3** ॥

धर्मयुक्तं च युक्तं च साम्प्रतं सम्प्रहर्षणम्।
अनुजो रावणस्याहं तेन चास्म्यवमानितः॥ **6.19.4** ॥

भवन्तं सर्वभूतानां शरण्यं शरणं गतः।
परित्यक्ता मया लङ्का मित्राणि च धनानि च॥ **6.19.5** ॥

भवद्गतं हि मे राज्यं जीवितं च सुखानि च।
तस्य तद् वचनं श्रुत्वा रामो वचनमब्रवीत्॥ **6.19.6** ॥

वचसा सान्त्वयित्वैनं लोचनाभ्यां पिबन्निव।
आख्याहि मम तत्त्वेन राक्षसानां बलाबलम्॥ **6.19.7** ॥

एवमुक्तं तदा रक्षो रामेणाक्लिष्टकर्मणा।
रावणस्य बलं सर्वमाख्यातुमुपचक्रमे॥ **6.19.8** ॥

अवध्यः सर्वभूतानां गन्धर्वोरगपक्षिणाम्।
राजपुत्र दशग्रीवो वरदानात् स्वयम्भुवः॥ **6.19.9** ॥

रावणानन्तरो भ्राता मम ज्येष्ठश्च वीर्यवान्।
कुम्भकर्णो महातेजाः शक्रप्रतिबलो युधि॥ **6.19.10** ॥

राम सेनापतिस्तस्य प्रहस्तो यदि ते श्रुतः।
कैलासे येन समरे मणिभद्रः पराजितः॥ **6.19.11** ॥

बद्धगोधाङ्गुलित्राणस्त्ववध्यकवचो युधि।
धनुरादाय यस्तिष्ठन्नदृश्यो भवतीन्द्रजित्॥ **6.19.12** ॥

सङ्ग्रामे सुमहद्व्यूहे तर्पयित्वा हुताशनम्।
अन्तर्धानगतः श्रीमानिन्द्रजिद्धन्ति राघव॥ **6.19.13** ॥

महोदरमहापार्श्वौ राक्षसश्चाप्यकम्पनः।
अनीकपास्तु तस्यैते लोकपालसमा युधि॥ **6.19.14** ॥

दशकोटिसहस्राणि रक्षसां कामरूपिणाम्।
मांसशोणितभक्ष्याणां लङ्कापुरनिवासिनाम्॥ **6.19.15** ॥

स तैस्तु सहितो राजा लोकपालानयोधयत्।
सह देवैस्तु ते भग्ना रावणेन दुरात्मना॥ **6.19.16** ॥

विभीषणस्य तु वचस्तच्छ्रुत्वा रघुसत्तमः।
अन्वीक्ष्य मनसा सर्वमिदं वचनमब्रवीत्॥ **6.19.17** ॥

यानि कर्मापदानानि रावणस्य विभीषण।
आख्यातानि च तत्त्वेन ह्यवगच्छामि तान्यहम्॥ **6.19.18** ॥

अहं हत्वा दशग्रीवं सप्रहस्तं सहात्मजम्।
राजानं त्वां करिष्यामि सत्यमेतच्छृणोतु मे॥ **6.19.19** ॥

रसातलं वा प्रविशेत् पातालं वापि रावणः।
पितामहसकाशं वा न मे जीवन् विमोक्ष्यते॥ **6.19.20** ॥

अहत्वा रावणं सङ्ख्ये सपुत्रजनबान्धवम्।
अयोध्यां न प्रवेक्ष्यामि त्रिभिस्तैर्भ्रातृभिः शपे॥ **6.19.21** ॥

श्रुत्वा तु वचनं तस्य रामस्याक्लिष्टकर्मणः।
शिरसाऽऽवन्द्य धर्मात्मा वक्तुमेवं प्रचक्रमे॥ **6.19.22** ॥

राक्षसानां वधे साह्यं लङ्कायाश्च प्रधर्षणे।
करिष्यामि यथाप्राणं प्रवेक्ष्यामि च वाहिनीम्॥ **6.19.23** ॥

इति ब्रुवाणं रामस्तु परिष्वज्य विभीषणम्।
अब्रवील्लक्ष्मणं प्रीतः समुद्राज्जलमानय॥ **6.19.24** ॥

तेन चेमं महाप्राज्ञमभिषिञ्च विभीषणम्।
राजानं रक्षसां क्षिप्रं प्रसन्ने मयि मानद॥ **6.19.25** ॥

एवमुक्तस्तु सौमित्रिरभ्यषिञ्चद् विभीषणम्।
मध्ये वानरमुख्यानां राजानं राजशासनात्॥ **6.19.26** ॥

तं प्रसादं तु रामस्य दृष्ट्वा सद्यः प्लवङ्गमाः।
प्रचुक्रुशुर्महात्मानं साधुसाध्विति चाब्रुवन्॥ **6.19.27** ॥

अब्रवीच्च हनूमांश्च सुग्रीवश्च विभीषणम्।
कथं सागरमक्षोभ्यं तराम वरुणालयम्।
सैन्यैः परिवृताः सर्वे वानराणां महौजसाम्॥ **6.19.28** ॥

उपायैरभिगच्छाम यथा नदनदीपतिम्।
तराम तरसा सर्वे ससैन्या वरुणालयम्॥ **6.19.29** ॥

एवमुक्तस्तु धर्मात्मा प्रत्युवाच विभीषणः।
समुद्रं राघवो राजा शरणं गन्तुमर्हति॥ **6.19.30** ॥

खानितः सगरेणायमप्रमेयो महोदधिः।
कर्तुमर्हति रामस्य ज्ञातेः कार्यं महोदधिः॥ **6.19.31** ॥

एवं विभीषणेनोक्तो राक्षसेन विपश्चिता।
आजगामाथ सुग्रीवो यत्र रामः सलक्ष्मणः॥ **6.19.32** ॥

ततश्चाख्यातुमारेभे विभीषणवचः शुभम्।
सुग्रीवो विपुलग्रीवः सागरस्योपवेशनम्॥ **6.19.33** ॥

प्रकृत्या धर्मशीलस्य रामस्यास्याप्यरोचत।
सलक्ष्मणं महातेजाः सुग्रीवं च हरीश्वरम्॥ **6.19.34** ॥

सत्क्रियार्थं क्रियादक्षं स्मितपूर्वमभाषत।
विभीषणस्य मन्त्रोऽयं मम लक्ष्मण रोचते॥ **6.19.35** ॥

सुग्रीवः पण्डितो नित्यं भवान् मन्त्रविचक्षणः।
उभाभ्यां सम्प्रधार्यार्थं रोचते यत् तदुच्यताम्॥ **6.19.36** ॥

एवमुक्तौ ततो वीरावुभौ सुग्रीवलक्ष्मणौ।
समुदाचारसंयुक्तमिदं वचनमूचतुः॥ **6.19.37** ॥

किमर्थं नौ नरव्याघ्र न रोचिष्यति राघव।
विभीषणेन यत् तूक्तमस्मिन् काले सुखावहम्॥ **6.19.38** ॥

अबद्ध्वा सागरे सेतुं घोरेऽस्मिन् वरुणालये।
लङ्का नासादितुं शक्या सेन्द्रैरपि सुरासुरैः॥ **6.19.39** ॥

विभीषणस्य शूरस्य यथार्थं क्रियतां वचः।
अलं कालात्ययं कृत्वा सागरोऽयं नियुज्यताम्।
यथा सैन्येन गच्छाम पुरीं रावणपालिताम्॥ **6.19.40** ॥

एवमुक्तः कुशास्तीर्णे तीरे नदनदीपतेः।
संविवेश तदा रामो वेद्यामिव हुताशनः॥ **6.19.41** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे एकोनविंशः सर्गः॥